# Vedanta Paribhasha

# वेदान्त परिभाषा

## Document Information

Text title : Vedanta Paribhasha

File name : paribhasha.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Dharmaraja Adhvarindra

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Latest update : March 8, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Vedanta Paribhasha

# वेदान्त परिभाषा

by  Dharmaraja Adhvarindra


१  प्रत्यक्ष प्रमाणम् ।

२  अनुमानम् ।

३  उपमानम् ।

४  आगमः ।

५  अर्थापत्तिः ।

६  अनुपलब्धि ।

७  प्रामाण्यम् ।

८  प्रयोजनम् ।


## १  प्रत्यक्ष प्रमाणम् ।

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥ १॥

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥ २॥

श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः ।
जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्तकान् ॥ ३॥

येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥ ४॥

टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पञ्चपादिका व्याकृता तथा ॥ ५॥

तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥ ६॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः, "न स पुनरावर्तते" इत्यादिश्रुत्या तस्यैव नित्यत्वावगमात्, इतरेषां त्रयाणां प्रत्यक्षेण, "तद्यथेह कर्मजितो लोकः क्षीयते, एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इत्यादिश्रुत्या च अनित्यत्वावगमाच्च । स च ब्रह्माज्ञानादिति ब्रह्म तज्ज्ञानं तत्प्रमाणञ्च सप्रपञ्चं निरूप्यते ।

तत्र प्रमाकरणं प्रमाणम् । तत्र स्मृतिव्यावृत्तं प्रमात्वमनधिगतावाधितार्थविषयकज्ञानत्वम् । स्मृतिसाधारणन्तु अवाधितार्थविषयकज्ञानत्वम् । नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन, धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषय-तत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः । किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्धटस्फुरणं तावद्धटाकारान्तःकरणवृत्तिरेकैव, न तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्; तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेव इति नाव्याप्तिशङ्कापि ।

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात् कथं तज्ज्ञानं प्रमाणम् ? उच्यते । ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः, "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्" इति श्रुतेः । न तु संसारदशायां बाधः, "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इति श्रुतेः । तथा च 'अबाधित' - पदेन संसारदशायामबाधितत्वं विवक्षितम्, इति न घटादिप्रमायमव्याप्तिः । तदुक्तम् -

"देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणान्त्वाऽऽत्मनिश्चयात् ॥" इति ।

'आ आत्मनिश्चयात्'-ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। 'लौकिकम्' इति घटादिज्ञानमित्यर्थः ।

तानि च प्रमाणानि षट् - प्रत्यक्षानुमानौपमानागम-अर्थापत्तिअनुपलब्धिभेदात् । तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्यमेव,

"यत् साक्षादपरोक्षाद् ब्रह्म" इति श्रुतेः ।
'अपरोक्षादि'त्यस्य अपरोक्षमित्यर्थः ।

ननु चैतन्यमनादि तत् कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति । उच्यते । चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जक- अन्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः । तदुक्तं विवरणे "अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्"।

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम्? इत्थम् । न तावदन्तःकरणम् निरवयवम्, सादिद्रव्यत्वेन सावयवत्वात् । सादित्वञ्च "तन्मनोऽसृजत" इत्यादिश्रुतेः । वृत्तिरूपज्ञानस्य मनोधर्मत्वे च "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" इति श्रुतिर्मानम् , 'धी' -शब्देन वृत्तिरूपज्ञानाभिधानात् । अत एव कामादेरपि मनोधर्मत्वम् ॥

ननु कामादेरन्तःकरणधर्मत्वे, "अहमिच्छामि, अहं जानामि, अहं बिभेमि"इत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते ? उच्यते । अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासाद् यथा "अयो दहति" इति व्यवहारः तथा सुखाद्याकारपरिणाम्यन्तः- करणैक्याध्यासात् "अहं सुखी, अहं दुःखी" इत्यादि व्यवहारः ।

ननु अन्तःकरणस्येन्द्रियतयाऽतीन्द्रियत्वात् कथं प्रत्यक्षविषयतेति । उच्यते । न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति ।"मनःषष्ठानीन्द्रियाणि" इति भगवद्गीतावचनं प्रमाणमिति चेत् न अनिन्द्रियेणापि मनसा षट्वसंख्यापूरणाविरोधात् । नहीन्द्रियगतसंख्यापूरणमिन्द्रियेनैवेति नियमः "यजमानपञ्चमा इडां भक्षयन्ति" इत्यत्र ऋत्विग्गतपञ्चत्वसंख्याया अनृत्विजाऽपि यजमानेन "वेदानध्यापयामास महाभारतपञ्चमान्

इत्यादौ च वेदगतपञ्चत्वसंख्याया अवेदेनापि भारतेन
पूरणदर्शनात्" इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च
परं मनः" इत्यादिश्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च ।
न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य
साक्षात्त्वं न स्यात् इन्द्रियाजन्यत्वादिति वाच्यम् ।
नहीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्
अनुमित्यादेरपिमनोजन्यतया साक्षात्त्वापत्तेः
ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ।
सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति चेत् किं ज्ञानगतस्य
प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किंवा विषयगतस्य ।
आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः ।

तथाहि त्रिविधं चैतन्यम् -
विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं
चेति । तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्
अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्
अन्तःकरणवच्छिन्नं चैतन्यं प्रमातृचैतन्यम् ।

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना
केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा
तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य
घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स
एव परिणामो वृत्तिरित्युच्यते । अनुमित्यादिस्थले तु अन्तःकरणस्य
न वह्न्यादिदेशगमनम् वह्न्यादेश्चक्षुराद्यसन्निकर्षात् ।
तथा च "अयं घटः"
इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च
बहिरेकत्र देशे समवधानात् तदुभयावच्छिन्नं चैतन्यमेकमेव
विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोः एकदेशस्थत्वेन
भेदाजनकत्वात् । अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो
न मठावच्छिन्नाकाशाद्भिद्यते । तथा च "अयं घटः
" इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया
घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य
चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम् ।
सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य

च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वात्
नियमेन "अहं सुखी" इत्यादिज्ञानस्य प्रत्यक्षत्वम् ।

नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेत् न तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालीनतया तत्तदवच्छिन्नचैतन्ययोर्भेदात् । उपाध्योरेकदेशस्थत्वे सति एककालीनत्वस्यैवोपाधेयाभेदप्रयोजकत्वात् । यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकम् तदा "अहं पूर्वं सुखी" इत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमातत्वं विषय-विशेषणं देयम् ।

नन्वेवमपि स्वकीयधर्माधर्मौ वर्तमानौ यदा शब्दादिना ज्ञायते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः तत्र धर्माद्यवच्छिन्न-तद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादिति चेत् न । योग्यत्वस्यापि विषयविशेषणत्वात् । अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिद्योग्यमित्यत्र फलवलकल्प्यः स्वभाव एव शरणम् । अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषात् सुखादिवत् धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा ।

न चैवमपि सुखस्य वर्तमानतादशायां "त्वं सुखी" इत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम् इष्टत्वात् । "दशमस्त्वमसि" इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात् ।

अत एव "पर्वतो वह्निमान्" इत्यादिज्ञानमपि बह्न्यंशे परोक्षम् पर्वतांशेऽपरोक्षम् पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात् । वह्न्यंशे तु अन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्न-चैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात् । तथाचानुभवः "पर्वतं पश्यामि" "वह्निमनुमिनोमि" इति । न्यायमते तु "पर्वतमनुमिनोमि" इत्युनुव्यवसायापत्तिः ।

असन्निकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम् । "सुरभि चन्दनम्" इत्यादिज्ञानमपि

चन्दनखण्डांशेऽपरोक्षम्
 सौरभांशे च परोक्षम्  सौरभस्य
चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात् ।

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे
तयोर्जातित्वं न स्यादिति वाच्यम्  इष्टत्वात् ।
जातित्वोपाधित्वपरिभाषायाः
सकलप्रमाणागोचरतयाऽप्रामाणिकत्वात् ।
"घटोऽयम्" इत्यादिप्रत्यक्षं हि घटत्वादिसद्भावे
मानम्  न तु तस्य जातित्वेपि जातित्वरूपसाध्यप्रसिद्धौ
तत्साधकानुमानस्याप्यनवकाशात् । समवायासिद्धया
ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य
घटत्वादावसिद्धेश्च । एवमेवोपाधित्वं निरसनीयम् ।

"पर्वतो वह्निमान्" इत्यादौ च पर्वतांशे वह्न्यंशे
चान्तःकरणवृत्तिभेदाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन
परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये वृत्तौ न कश्चित् विरोधः । तथा
च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्यभिन्नत्वं
तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् ।

घटादेर्विषयस्य प्रत्यक्षत्वन्तु प्रमात्रभिन्नत्वम् ।
ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्यभेदः "अहमिदं
पश्यामि" इति भेदानुभवविरोधादिति चेत्  उच्यते । प्रमात्रभेदो
नाम न तावदैक्यम्  किन्तु प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः । तथा
च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव
घटादिसत्ता  अधिष्ठानसत्तातिरिक्तया
आरोपितसत्तायानङ्गीकारात् ।  विषयचैतन्यं च
पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यैस्यैव
घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति
सिद्धं घटादेरपरोक्षत्वम्  अनुमित्यादिस्थले त्वन्तःकरणस्य
वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य
प्रमातृचैतन्यात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्ना इति नातिव्याप्तिः ।

नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले
धर्माधर्मयोः प्रत्यक्षत्वापत्तिः
धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया

धर्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेत्
न योग्यत्वस्यापि विशेषविशेषणत्वात् ।

नन्वेवमपि "रूपी घटः" इति प्रत्यक्षस्थले
घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः
रूपावच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य
चैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे
परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया
परिमाणादिमत्तायाः प्रमातृसत्तातिरिक्तत्वाभावात्
इति चेत् न तत्तदाकारवृत्त्युपहितत्वस्यापि
प्रमातृविशेषणत्वात् ।
रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन अतिव्याप्त्यभावात् ।

नन्वेवं वृत्तावव्याप्तिः अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण
तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावात् इति चेत् न ।
अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन
स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात् ।

एवाञ्चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि
तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्तान्नाव्याप्तिः ।
न चान्तःकरणतद्धर्मादीनं
वृत्तिविषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमविरोध
इति वाच्यम् । न हि वृत्तिं विना साक्षिविषयत्वं
केवलसाक्षिवेद्यत्वम् किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण
साक्षिविषयत्वम् अत
एवाहङ्कारटीकायामाचार्यैरहमाकारान्तः-
करणवृत्तिरङ्गीकृता । अत एव च प्रातिभासिकरजतस्थले
रजताकाराविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता । तथाचान्तःकरणतद्धर्मादिषु
केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य
सत्त्वान्नाव्याप्तिः । तदयं निर्गलितार्थः -
"स्वाकारवृत्त्युपहित-
प्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य
प्रत्यक्षत्वम् ।"
तत्र संयोग- संयुक्ततादात्म्यादीनां सन्निकार्षाणां
चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः ।

सा च वृत्तिश्चतुर्विधा - संशयो निश्चयो गर्वः स्मरणमिति ।
एवंविधवृत्तिभेदेन एवमप्यन्तःकरणं मन
इति बुद्धिरिति अहङ्कार इति चित्तमिति चाख्यायते । तदुक्तम् -
"मनोबुद्धिरहङ्कारश्चित्तं करणमन्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥"

तच्च प्रत्यक्षं द्विविधम् सविकल्पकनिर्विकल्पकभेदात् । तत्र सविकल्पकं वैशिष्ठ्यावगाहि ज्ञानम् । यथा
"घटमहं जानामि" इत्यादिज्ञानम् ।
निर्विकल्पकन्तु संसर्गानवगाहि ज्ञानम् । यथा
"सोऽयं देवदत्तः" "तत्त्वमसि" इत्यादिवाक्यजन्यं ज्ञानम् ।

ननु शाब्दमिदं ज्ञानम् न प्रत्यक्षम् इन्द्रियाजन्यत्वात् इति चेत् न । नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रम् दूषितत्वात् किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् । तथाच "सोऽयं देवदत्तः" इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्य- भ्युपगमेन देवदत्तवच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नतया "सोऽयं देवदत्तः" इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम् । एवं "तत्त्वमसि" इत्यादिवाक्यजन्यज्ञानस्यापि तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात् ।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम् ? उच्यते । वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम् अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः किन्तु तात्पर्यविषयत्वम् । प्रकृते च "सदेव सोम्येदमग्र आसीत्" इत्युपक्रम्य "तत् सत्यम् स आत्मा तत्त्वमसि श्वेतकेतो" इत्युपसंहारेण विशुद्धेब्रह्मणि वेदान्तानां तात्पर्यमवसितम् इति कथं तात्पर्याविषयं संसर्गमवबोधयेत् । इदमेव "तत्त्वमसि" इत्यादिवाक्यानामखण्डार्थत्वं यत् संसर्गानवगाहियथार्थज्ञानजनकत्वमिति । तदुक्तम् ।

"संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥"
प्रातिपदिकार्थमात्रपरत्वं वाऽखण्डार्थत्वम् इति चतुर्थपादार्थः ।

तच्च प्रत्यक्षं पुनर्द्विविधम् - जीवसाक्षि ईश्वरसाक्षि चेति । तत्र जीवो नाम अन्तःकरणावच्छिन्नं चैतन्यम् तत्साक्षी तु अन्तःकरणोपहितं चैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः । विशेषणञ्च कार्यान्वयि वर्तमानं व्यावर्तकम् उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च । "रूपविशिष्टोघटोऽनित्यः"इत्यत्र रूपं विशेषणम् "कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्" इत्यत्र कर्णशष्कुल्युपाधिः । अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते । प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम् । अयञ्च जीवसाक्षी प्रत्यात्मं नाना एकत्वे चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्गः । ईश्वरसाक्षी तु मायोपहितं चैतन्यम् । तच्चैकम् तदुपाधिभूतमायाया एकत्वात् । "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागत-शक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभि-प्रायतया वोपपत्तिः ।

"मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।"
"तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी मायाममेयाम तस्मै विद्यात्मने नमः ॥"
"अजामेकां लोहितशुक्लकृष्णां
वह्वीः प्रजा सृजमानां सरूपाः ।
अजो ह्येको जुषमानोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः ॥"
इत्यादि श्रुतिस्मृतिषु एकवचनेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते ।

ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षी । तच्चानादि तदुपाधेर्मायाया अनादित्वात् । मायावच्छिन्नं चैतन्यं च परमेश्वरः ।

मायाया विशेषणत्वे ईश्वरत्वं उपाधित्वे साक्षित्वं इतीश्वरत्वसाक्षित्वयोर्भेदः न तु धर्मिणोरीश्वरतत्साक्षिणोः ।

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्माविष्णुमहेश्वरादिशब्दवाच्यतां भजते ।

ननु ईश्वरसाक्षिणोऽनादित्वे "तदैक्षत बहुस्यां प्रजायेय" इत्यादौ सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते उच्यते । यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा सृज्यमान-प्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषाः "इदमिदानीं स्त्रष्टव्यम्" "इदमिदानीं पालयितव्यम्" " इदमिदानीं संहर्तव्यम्" इत्याद्याकारा जायन्ते । तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितचैतन्यमपि सादीत्युच्यते । एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम् । प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं च निरूपितम् । तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव " पर्वतो वह्निमान्" इत्यादावपि वह्न्यद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात् । तत्तद्विषयाशप्रत्यक्षत्वन्तु पूर्वोक्तमेव । तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्यापितः भ्रमप्रमासाधारणप्रत्यक्षत्व-सामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात् । यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम् । शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिक-रजतादिविषयकत्वेनोक्तलक्षणाभावात् नातिव्याप्तिः ।

ननु विसंवादिप्रवृत्त्या भ्रान्तिज्ञातसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणम् देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसम्भवादिति चेत् न तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् । न च ज्ञानं तत्र प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानाद्युच्छेदापत्तेः ।

ननु रजतोत्पादकानां रजतावयवादीनामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत् उच्यते । न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव । तथा हि काचादिदिषदूषितलोचनस्य पुरोवर्ति-

द्रव्यसंयोगादिदमाकारा चाकचिक्याकारा च काचिदन्तःकरण-
वृत्तिरुदेति । तस्यां च वृत्तौ इदमवच्छिन्नचैतन्यं प्रतिबिम्बते ।
तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेन इदमवच्छिन्नचैतन्यवृत्तवच्छिन्न-
चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति । ततश्च प्रमातृचैतन्या-
भिन्नविषयचैतन्यनिष्ठा शुक्तित्व प्रकारिकाऽविद्या चाकचिक्यादि-
सादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोष-
समवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते ।

परिणामो नाम उपादानसमसत्ताककार्यापत्तिः ।
विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः ।
प्रातिभासिकरजतञ्चाविद्यापेक्षया परिणाम इति
चैतन्यापेक्षयाविवर्त इति चोच्यते ।
अविद्यापरिणामरूपञ्च तद्रजतमविद्याधिष्ठाने
इदमवच्छिन्नचैतन्ये वर्तते अस्मन्मते सर्वस्यापि
कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात् ।

ननु चैतन्यनिष्ठरजतस्य कथमिदं रजतमितिपुरवर्तिना
तादात्म्यम् । उच्यते - यथा न्यायमते आत्मनिष्ठस्य
सुखादेः शरीरनिष्ठत्वेनोपलम्भः शरीरस्य
सुखाद्यधिकरणतावच्छेदकत्वात् तथा चैतन्यमात्रस्य
रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य
तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य
पुरोवर्तिसंसर्गप्रत्यय उपपद्यते । तस्य च
विषयचैतन्यस्य तदन्तःकरणोपहित चैतन्याभिन्नतया
विषयचैतन्येऽध्यस्तमपि रजतं साक्षिण्यध्यस्तं
केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते ।

ननु साक्षिण्यध्यस्तत्वे " अहं रजतम् " इति " तद्वान् "
इति वा प्रत्ययः स्यात् " अहं सुखी " इतिवत् इति चेत्
उच्यते । न हि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठा-
विद्याकार्यत्वप्रयुक्तम् " अहं सुखी " इति ज्ञानम् सुखादीनां
घटादिवच्छुद्धचैतन्य एवाध्यासात् । किन्तु यस्य यदाकारा-
नुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारा-
नुभवविषयत्वम् इत्येवानुगतं नियामकम् । तथा च
इदमाकारानुभवाहितसंस्कारसहिताविद्याकार्यत्वाद् घटादे-

रिदमाकारानुभवविषयत्वम्  अहमाकारानुभवाहितसंकार-
सहकृताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्
शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वा-
दुभयविधानुभवविषयत्वम् ।  तथाचोभयविधानुभवः - इदं
शरीरम्  अहं देहः  अहं मनुष्यः  अहं ब्राह्मणः  इदं चक्षुः
अहं काणः  इदं श्रोत्रम्  अहं बधिर  इति । प्रकृते
प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमवच्छिन्नचैतन्य-
निष्ठाविद्याकार्यत्वेऽपि इदं रजतमिति सत्यस्थलीयेदमाकारा-
नुभवाहितसंस्कारजन्यत्वाद्दिदमाकारानुभवविषयता न तु
" अहं रजतम् " इत्यहमाकारानुभवविषयता इत्यनुसन्धेयम् ।

नन्वेवमपि मिथ्यारजतस्य साक्षात् साक्षिसम्बन्धितया भानसम्भवे
रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थमिति चेत्
उच्यते । स्वगोचरवृत्त्युपहितप्रमातृचैतन्यभिन्नसत्ताकत्वाभावस्य
विषयापरोक्षत्वरूपतया रजतस्यापरोक्षसिद्धये तदभ्युपगमात् ।
नन्विदंवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद्विशिष्ट-
ज्ञानानभ्युपगमे कुतो भ्रमज्ञानासिद्धिरिति चेत्  न  वृत्तिद्वय-
प्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन
भ्रमत्वस्वीकारात् । अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया
प्रामाण्यानियमादप्रामाण्योक्तिः साम्प्रदायिकानाम् ।

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यमध्यस्तञ्चेति
कथं शुक्तिरूप्यस्य ततो वैलक्षण्यम् इति चेत्  न । त्वन्मते
सत्यत्वाविशेषेऽपि केषाञ्चित् क्षणिकत्वं केषाञ्चित् स्थायित्वम्
इत्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि । यद्वा
घटाद्यध्यासे अविद्यैव दोषत्वेन हेतुः  शुक्तिरूपाद्यध्यासे तु
काचादयोऽपि दोषाः । तथाचागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे
प्रयोजकम् । अत एव स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादोषजन्यत्वात् ।
प्रातिभासिकत्वम् ।

ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ
न रथादिसृष्टिकल्पनम्  गौरवात्  इति चेत्  न  रथादेः
स्मृतिमात्राभ्युपगमे " रथं पश्यामि " " स्वप्ने रथ-
मद्राक्ष्यम् " इत्याद्यनुभवविरोधापत्तेः । " अथ रथान्
रथयोगान् पथः सृजते " इति रथादिसृष्टिप्रतिपादकश्रुति-

विरोधापत्तेश्च । तस्मात् शुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिका यावत्प्रतिभासमवतिष्ठन्ते ।

ननु स्वप्ने रथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदाऽसन्निकृष्टतया अनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्यव्यः तथा च रथाद्यध्यासः कुत्र इति चेत् न चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात् । प्रतीयमानं रथाद्यस्तीत्येव प्रतीयते इति सद्रूपेन प्रकाशमानं चैतन्यमेवाधिष्ठानम् । देशविशेषोऽपि चिदध्यस्तः प्रातिभासिकः रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकम् तदा सर्वेन्द्रियाणामुपरमात् । " अहं रथः " इत्यादिप्रतीत्यापादनन्तु पूर्ववन्निरसनीयम् । स्वप्नरथदयः साक्षान्मायापरिणामा इति केचित् । अन्तःकरणद्वारा तत्परिणामा इत्यन्ये ।

ननु रथादेः शुद्धचैतन्याध्यस्तत्वे इदानीं तत्साक्षात्काराभावेनजागरणेऽपि स्वप्नोपलब्धरथादयोऽनुवर्तेरन् । उच्यते । कार्यविनाशो हि द्विविधः कश्चिदुपादानेन सह कश्चित्तु विद्यमानएवोपादाने । आद्यो बाधः द्वितीयस्तु निवृत्तिः । आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः तेन विनोपादानभूताया अविद्याया अनिवृत्तेः । द्वितीयस्य कारणं विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिर्वा । तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो मा बाधिष्ठ मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वजनकीभूतनिद्रादिदोषनाशेन वा रथादिनिवृत्तौ को विरोधः ।

एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे शुक्तिरितिज्ञानेन तदज्ञानेन सह रजतस्य बाधः । मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मसाक्षात्कारमात्रनिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रम् मुसलप्रहारेण घटस्येव ।

ननु शुक्तौ रजतस्य प्रतिभाससमये प्रातिभासिकसत्ताभ्युपगमे " नेदं रजतम् " इति त्रैकालिकनिषेधज्ञानं न स्यात् किन्तु " इदानीमिदं न रजतम् " इति स्यात् " इदानीं घटः श्यामो न " इतिवत् इति चेत् न नहि तत्र रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः किन्तु लौकिकपारमार्थिकत्वावच्छिन्न- प्रातिभासिकरजतप्रतियोगिताकः व्यधिकरणधर्मावच्छिन्नप्रतैयोगिताकाभावाभ्युपगमात् ।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतं न वा । अनवगमे प्रतियोगितावच्छेदकावच्छिन्नरजतस्त्वज्ञानाभावादभाव-प्रत्यक्षानुपपत्तिः । अवगमेऽपरोक्षावभासस्य तत्कालीनविषय-सत्तानियतत्वाद् रजते पारमार्थिकत्वमप्यनिर्वचनीयं रजतदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तत्र कथं वर्तत इति चेत्  न  पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् । अत एव इन्द्रियसन्निकृष्टतया जवाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवात्  न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः । नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रियतामिति चेत् न  इष्टत्वात् ।

एवं प्रत्यक्षभ्रमान्तरेष्वपिप्रत्यक्षसामान्यलक्षणानुगमो यथार्थप्रत्यक्षलक्षणासद्भावश्च दर्शनीयः ।
उक्तं प्रत्यक्षं प्रकारान्तरेण द्विविधम् - इन्द्रियजन्यं तदजन्यं चेति । तत्रेन्द्रियाजन्यं सुखादित्रत्यक्षम्  मनस इन्द्रियत्वनिराकरणात् । इन्द्रियाणि पञ्च  घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि । सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति । तत्र घ्राणरसनत्वगिन्द्रियाणि स्वस्थानस्थितान्येव गन्धरस-स्पर्शोपलम्भान् जनयन्ति  चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः  श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतयाभेर्यादिदेशगमनसम्भवात् । अत एवानुभवो "भेरीशब्दो मया श्रुतः"  इति । वीचितरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनायां गौरवम् "भेरीशब्दो मया श्रुतः" इति प्रत्यक्षस्य भ्रमत्वकल्पनायां गौरवं च स्यात् ।

तदेवं व्याख्यातं प्रत्यक्षम् ।
इति वेदान्तपरिभषायां प्रत्यक्षपरिच्छेदः ।

## २  ॥ अनुमानम् ॥

अथानुमानं निरूप्यते । अनुमितिकरणमनुमानम् । अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या । व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम् ।

अनुमितिकरणं च व्याप्तिज्ञानम् । तत्संस्कारोऽवान्तरव्यापारः । न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम् तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात् । न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः स्मृतिप्रागभावजन्यत्वस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात् ।

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारोहेतुरिति वाच्यम् व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानिमितिहेतुत्वात् । नहि स्मृतेः संस्कारनाशकत्वनियमः स्मृतिधारादर्शनात् । न चानुबुद्धसंस्कारादप्यनुमित्यापत्तिः तदुद्बोधस्यापि सहकारित्वात् । एवं च " अयं धूमवान् " इति पक्षधर्मताज्ञाने " धूमो वह्निव्याप्यः " इत्यनुभवाहितसंस्कारोद्बोधे च सति " वह्निमान् " इत्यनुमितिर्भवति । न तु मध्ये व्याप्तिस्मरणम् तज्जन्यं " वह्निव्याप्यधूमवानयम् " इत्यादि विशिष्टज्ञानं वा हेतुत्वेन कल्पनीयम् गौरवान्मानाभावाच्च । तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणम् न तु पर्वतविषयकज्ञानांश इति " पर्वतो वह्निमान् " इति ज्ञानस्य वह्न्यंश एव अनुमितित्वम् न पर्वतांशे तदंशे प्रत्यक्षत्वस्योपपादितत्वात् । व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा । सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते । तच्च सहचारदर्शनं भूयोदर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः सहचारदर्शनस्यैव प्रयोजकत्वात् ।

तच्चानुमानमन्वयिरूपमेकमेव । न तु केवलान्वयि सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः । नाप्यनुमानस्य व्यतिरेकिरूपत्वम् साध्याभावे साधनाभाव-निरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात् । कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्ति-

ज्ञानादनुमितिः । अर्थापत्तिप्रमाणादिति वक्ष्यामः । अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वम् व्यतिरेकव्याप्तिरूपत्वम् व्यतिरेकव्याप्तिज्ञानस्य अनुमित्यहेतुत्वात् ।

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम् । तत्र स्वार्थन्तूक्तमेव परार्थन्तु न्यायसाध्यम् । न्यायो नामावयवसमुदायः । अवयवश्च त्रय एव - प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपा वा । न तु पञ्च अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकवयव-द्वयस्य व्यर्थत्वात् ।

एवमनुमाने निरूपिते तस्माद् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः । तथाहि - ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वात् यदेवं तदेवम् यथा शुक्तिरूप्यम् । न च दृष्टान्तसिद्धिः तस्य साधितत्वात् । न चाप्रयोजकत्वम् शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे ब्रह्मभिन्नत्वस्यै लाघवेन प्रयोजकत्वात् । मिथ्यात्वं च स्वाश्रयत्वेनाभिमत-यावन्निष्ठात्यन्ताभावप्रतियोगित्वम् । ' अभिमत '-पदं वस्तुतः स्वाश्रयाप्रसिद्ध्याऽसम्भववारणाय ' यावत् ' - पदमर्थान्तरवारणाय । तदुक्तम् -

" सर्वेषामपि भावाना स्वाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥" इति ।

यद्वा अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवत् - इत्याद्यनुमानं मिथ्यात्वे प्रमाणम् । तदुक्तम् -

" अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः ।
अंशित्वादितरांशीव दिगेषैव गुणादिषु ॥" इति ।

न च घटादेर्मिथ्यात्वे" सन् घटः" इति प्रत्यक्षेण बाधः अधिष्ठानब्रह्मसत्तयास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः ।

न च नीरूपस्य ब्रह्मणः कथं चाक्षादिज्ञान्विषयतेति वाच्यम् नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात् । न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः मन्मते ब्रह्मणो द्रव्यत्यासिद्धेः । गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वम् इति तेऽभिमतम् । न हि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता समवायासिद्धेः । अस्तु वा द्रव्यत्वं ब्रह्मणः तथापि नीरूपस्य कालस्येव चाक्षुषादि -

ज्ञानविषयत्वे न विरोधः ।

यद्वा त्रिविधं सत्त्वम् - पारमार्थिकं व्यावहारिकं प्रातिभासिकं चेति । पारमार्थिकं सत्त्वं ब्रह्मणः व्यावहारिकं सत्त्वमाकाशादेः प्रातिभासिकं सत्त्वं शुक्तिरजतादेः । तथा च " घटः सन्" इति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम् । अस्मिन् पक्षे घटादेर्ब्रह्मणि निषेधो न स्वरूपेण किन्तु पारमार्थिकत्वेनैवेति न विरोधः । अस्मिन् पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्व - मत्यन्ताभावविशेषणं द्रष्टव्यम् । तस्मादुपपन्नं मिथ्यात्वानुमानमिति ।

इति वेदान्तपरिभाषायामनुमानपरिच्छेदः ।

## ३ उपमानम् ।

अथोपमानं निरूप्यते । तत्र सादृश्यप्रमाकरणमुपमानम् । तथा हि - नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः"अयं पिण्डो गोसदृशः" इति । तदनन्तरं च भवति निश्चयः"अनेन सदृशी मदीया " गौः" इति । तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणम् गोनिष्ठगवयसादृश्यज्ञानं फलम् ।

न चेदं प्रत्यक्षेण सम्भवति गोपिण्डस्य तदेन्द्रियासन्निकर्षात् । नाप्यनुमानेन गवयनिष्ठगोसादृश्यस्य अतल्लिङ्गत्वात् । नापि

मदीया गौरेतद्गवयसदृशी
एतन्निष्ठसादृश्यप्रतियोगित्वात्
यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः
यथा मैत्रनिष्ठसादृश्यप्रतियोगी चत्रो मैत्रसदृशः -

इत्यनुमानात् तत्सम्भवैति वाच्यम् । एवंविधानुमानानवतारेऽपि " अनेन सदृशी मदीया गौः" इति प्रतीतेरनुभवसिद्धत्वात् " उपमिनोमि" इत्यनुव्यवसायाच्च । तस्मादुपमानं मानान्तरम् ।

इति वेदान्तपरिभाषायामुपमानपरिच्छेदः ।

## ४ आगमः ।

अथागमो निरूप्यते । यस्य वाक्यस्य तात्पर्य विषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम् । वाक्यजन्यज्ञाने च आकांक्षायोग्यताऽऽसत्तयस्तात्पर्यज्ञानं च इति चत्वारि कारणानि ।

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकांक्षा । क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषयत्वात् ऽजिज्ञासोरपि वाक्यार्थबोधात् ' योग्यत्व" मुपात्तम् । तदवच्छेदकं च क्रियात्वकारकत्वादिकमितिनातिव्याप्तिः गौरश्व इत्यादौ । अभेदान्वये च समानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमिति" तत्त्वमस्या" दिवाक्येषु नाव्याप्तिः ।

एतादृशाकांक्षाभिप्रायेणैव बलाबलाधिकरणे" सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेव - यागस्यामिक्षान्वितत्वेन न वाजिनाकांक्षा इत्यादिव्यवहारः । ननु तत्रापि वाजिनस्य जिज्ञासाऽविषयत्वेऽपि तद्योग्यत्वमस्त्येव प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वादिति चेत् न स्वसमानजातीयपदार्थावयबोधविरहसहकृतप्रदेय - द्रव्यत्यस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमान - जातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात् । आमिक्षायान्तु नैवम् वाजिनान्वयस्य तदानुपस्थित्वात् । उदाहरणान्तरेष्वपि दुर्बलत्वप्रयोजक आकांक्षाविरह एव द्रष्टव्यः ।

योग्यता तात्पर्यविषयसंसर्गाबाधः ।" वह्निना सिञ्चति" इत्यादौ तादृशसंसर्गबाधान्न योग्यता ।" स प्रजापतिरात्मनो वपामुदखिदत्" इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्याबाधात् योग्यता ।" तत्त्वमस्या" - दिवाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदे बाधाभावात् योग्यता ।

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः । मानान्तरोपस्थापितपदार्थस्यान्वयबोधाभावात् ' पदजन्या ' इति । अत एवाश्रुतस्थले तत्तत्पदाध्याहारः । ' द्वारम् ' इत्यादौ ' पिधेहि ' इति । अत एव ' इषे त्वा ' इत्यादिमन्त्रे ' छिनद्मि ' इति पदाध्याहारः । अत एव विकृतिषु" सूर्याय जुष्टं निर्वपामि" इति पदप्रयोगः ।

पदार्थश्च द्विविधः - शक्यो लक्ष्यश्चेति । तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः । यथा ' घट ' - पदस्य

पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः । सा च शक्तिः पदार्थान्तरम् सिद्धान्ते कारणेषु कार्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात् । सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया । तादृशशक्तिविषयत्वं शक्यत्वम् ।

तच्च जातेरेव न व्यक्तेः व्यक्तीनामानन्त्येन गुरुत्वात् । कथं तर्हि गवादिपदाद्व्यक्तिमानमिति चेत् जातेर्व्यक्ति - समानसंवित्संवेद्यत्वादिति ब्रूमः । यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती न तु ज्ञाता हेतुः जातौ तु सा ज्ञाता हेतुः । न च व्यक्त्यंशे शक्तिज्ञानमपि कारणम् गुअरवात् । जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिमत्त्वज्ञानं विना व्यक्तिधीविलम्बाभावाच्च । अत एव न्यायमतेऽप्यन्वये शक्तिः स्वरूपसतीति सिद्धान्तः ।

ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या । अथवा व्यक्तर्लक्षणयाऽवगमः । यथा " नीलो घटः " इत्यत्र ' नील ' - शब्दस्य नीलगुणविशिष्टे लक्षणा तथा जातिवाचकस्य तद्विशिष्टे लक्षणा । तदुक्तम् " अनन्यलभ्यः शब्दार्थः " इति । एवं शक्यो निरूपितः ।

अथ ' लक्ष्य ' - पदार्थो निरूप्यते । तत्र लक्षणाविषयो लक्ष्यः । लक्षणा च द्विविधा - केवललक्षणा लक्षितलक्षणा चेति । तत्र शक्यसाक्षात्सम्बन्धः केवलक्षणा । यथा " गङ्गायां घोषः " इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे ' गङ्गा ' - पदस्य केवललक्षणा । यत्र शक्यपरम्परा - सम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा यथा ' द्विरेफ ' - पदस्य रेफद्वये शक्तस्य ' भ्रमर ' - पदघटित - परम्परासम्बन्धेन मधुकरे वृत्तिः । गौण्यपि लक्षितलक्षणैव । यथा " सिंहो मानवकः " इत्यत्र ' सिंह ' - शब्दवाच्य सम्बन्दिक्रौर्यादिसम्बन्धेन मानवकस्य प्रतीतिः ।

प्रकारान्तरेण लक्षणा त्रिविधा - जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा । तत्र शक्यमनन्तर्भाव्य यत्रार्थान्तर - प्रतीतिस्तत्र जहल्लक्षणा । यथा " विषं भुंक्ष्व " इत्यत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते । यत्र शक्यार्थ - मन्तर्भाव्यैवार्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा

" शुक्लो घटः" इति । अत्र हि ' शुक्ल ' - शब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्तते । यत्र हि विशिष्टवाचकः शब्द एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा यया" सोऽयं देवदत्तः" इति । अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्या - नुपपत्या पदद्वयस्य विशेष्यमात्रपरत्वम् । यथा वा " तत्त्वमसि" इत्यादौ ' तत् ' - पद्वाच्यस्य सर्वज्ञत्वादिविशिष्टस्य ' त्वं ' - पदवाच्येनान्तःकरण - विशिष्टेनैक्यायोगात् ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः ।

वयन्तु ब्रूमः - " सोऽयं देवदत्तः ," तत्त्वमसि" इत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेऽपि न लक्षणा शक्त्युपस्थितविशिष्टयोः अभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेव अभेदान्वयाविरोधात् । यथा " घटोऽनित्यः" इत्यत्र ' घट ' - पदवाच्यैकदेशघटत्वस्य - अयोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः । यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिः तत्रैव स्वातन्त्र्येणौपस्थितये लक्षणभ्युपगमः । यथा " नित्यो घटः" इत्यत्र ' घट" - पदात् घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं ' घट-पदस्य घटत्वे लक्षणा । एवमेव" तत्त्वमसि" इत्यादिवाक्येऽपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोः ' तत्त्वं ' - पदार्थयोरभेदान्वये बाधकाभावात् । अन्यथा " गेहे घटः" " घटे रूपम्" " घटमानय" इत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि ' घटा ' - दिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात् । तस्मात्" तत्त्वमसि" इत्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या ।

जहदजहल्लक्षणोदाहरणन्तु" काकेभ्यो दधि रक्ष्यताम्" इत्याद्येव तत्र शक्यकाकत्वपरित्यागेन अशक्यदध्युपधातकत्व- पुरस्कारेणाकाकेऽपि ' काक ' - शब्दप्रवृत्तेः ।

लक्षणाबीजन्तु तात्पर्यानुपपत्तिरेव न तु अन्वयानुपपत्तिः " काकेभ्यो दधि रक्ष्यताम्" इत्यत्र अन्वयानुपपत्त्यभावात् " गङ्गायां घोषः" इत्यादौ तात्पर्यानुपपत्तेरपि सम्भवात् ।

लक्षणा च न पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि । यथा " गम्भीरायां नद्यां घोषः" इत्यत्र" गम्भीरायां नद्याम्" इति पदद्वयसमुदायस्य तीरे लक्षणा । ननु वाक्यस्याशक्ततया कथं शक्यसम्बन्धरूपा लक्षणा उच्यते । शक्त्या यत् पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा । शक्तिज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः ।

एवमर्थवादवाक्यानां प्रशंसारूपाणां प्राशस्त्ये लक्षणा " सोऽरोदीत्" इत्यादिनिन्दार्थवादवाक्यानां निन्दितत्वे लक्षणा । अर्थवादगतपदानां प्राशत्यादिलक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्य स्यात् । एवं च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिवाक्येनैकवाक्यत्वं भवति इत्यर्थवादवाक्यानां पदैकवाक्यता । क्व तर्हि वाक्यैकवाक्यता । यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेन महावाक्यार्थबोधकत्वम् । यथा" दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यानां" समिधो यजति" इत्यादिवाक्यानां च परस्परोपेक्षिताङ्गाङ्गिभावबोधकतया एकवाक्यता । तदुक्तं भट्टपादैः -

" स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥" इति ।

एवं द्विविधोऽपि पदार्थो निरूपितः । तदुपस्थितिश्चासत्तिः । सा च शाब्दबोधे हेतुः तथैवान्वयव्यतिरेकदर्शनात् । एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः तथैवान्वया - द्यवधारणात् ।

क्रमप्राप्तं तात्पर्यं निरूप्यते । तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम् अर्थज्ञानशून्येन पुरूषेणोच्चरिताद्वेदादर्थप्रत्याया- भावप्रसङ्गात्" अयमध्यापकोऽव्युत्पन्नः" इति विशेषदर्शनेन तात्पर्यभ्रमस्याप्यभावात् । न चेश्वरीयतात्पर्यज्ञानात्

तत्र शाब्दबोध इति वाच्यम् ईश्वरानङ्गीकर्तृरपि तद्वाक्यार्थ-
प्रतिपत्तिदर्शनात् उच्यते । तत्प्रतीतिजननयोग्यत्वं तात्पर्यम् ।
" गेहे घटः " इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यम्
न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरम्
न तु पटसंसर्गपरमित्युच्यते ।

ननु " सैन्धवमानय " इत्यादिवाक्यं यदा लवणानयन -
प्रतीतीच्छया प्रयुक्तं तदापि अश्वसंसर्गप्रतीतिजनने
स्वरूपयोग्यतासत्त्वात् लवणपरत्वज्ञानदशायामश्वादि -
संसर्गज्ञानापत्तिरिति चेत् न तदितरपरतीतीच्छया -
नुच्चरितत्वस्यापितात्पर्यं प्रति विशेषणत्वात् । तथा च
यद्वाक्यं यत्प्रतीतिजननस्वरूपयोग्यत्वे सति
यदन्यप्रतीतीच्छया नोच्चरितम् तद्वाक्यं तत्संसर्ग -
परमित्युच्यते । शुकादिवाक्ये अव्युत्पन्नोच्चरितवेदवाक्यादो
च प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयो -
च्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः । न
चोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः तदन्यमात्र -
प्रतीतीच्छयाऽनुच्चरितत्वस्य विवक्षितत्वात् ।

उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः ।
अस्माकं मते सर्वत्र कारणतायाः शक्तेरेवावच्छेदकत्वान्न
कोऽपि दोषः ।

एवं तात्पर्यस्य तत्प्रत्तितिजनकत्वरूपस्य शाब्दज्ञानजनकत्वे
सिद्धे चतुर्थवर्णके तात्पर्यस्य शाब्दज्ञानहेतुत्वेनिराकरणवाक्यं
तत्प्रतीतीच्छयोच्चरितत्वरूपतातात्पर्यनिराकरणपरम् अन्यथा
तात्पर्यनिश्चयफलकवेदान्तविचारवैयर्थ्यप्रसङ्गात् । केचित्तु -
शाब्दज्ञात्वावच्छेदेन न तात्पर्यज्ञानं हेतुरित्येवंपरम्
चतुर्थवर्णकवाक्यम् तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषे
च तात्पर्यज्ञानं हेतुरेव इदं वाक्यमेतत्परमुतान्यपरमिति संशये
तद्विपर्यये च तदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्यनिश्चयं
विनाऽनुपपत्तेरित्याहुः ।

तच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधर्यते
लोके तु प्रकरणादिना । तत्र लौकिकवाक्यानां मानान्तरा -
वगतार्थतयाऽनुवादकत्वम् वेदे तु वाक्यार्थस्यापूर्वतया

नानुवादकत्वम् । तत्र लोके वेदे च कार्यपराणामिव सिद्धर्थानामपि प्रामाण्यम् " पुत्रस्ते जातः" इत्यादिषुअ सिद्धार्थेऽपि पदानां सामर्थ्यावधारणात् । अत एव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम् । यथ चैतत् तथा विषयपरिच्छेदे वक्ष्यते ।

तत्र वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति - नैयायिकाः । वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमिथ्यध्वरमीमांसकाः । अस्माकं तु मते वेदो न नित्यः उत्पत्तिमत्त्वात् । उत्पत्तिमत्त्वं च" अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः" इत्यादिश्रुतेः ।

नापि वेदानां त्रिक्षणवस्थायित्वम् " य एव वेदो देवदत्तेनाधीतः सः एव मयामि" इत्यादिप्रत्यभिज्ञाविरोधात् । अत एव गकारादिवर्णानामपि न क्षणिकत्वम् " सोऽयं गकारः" इत्यादिप्रत्यभिज्ञाविरोधात् । तथा च वर्णपदवाक्यसमुदायस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्तिकत्वं प्रलयकालीन - ध्वंसप्रतियोगित्वं च  न तु मध्ये वर्णानामुत्पत्तिविनाशौ अनन्तगकारादिकल्पनायां गौरवात् । अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यञ्जकाभावात् न विरुध्यते  अन्धकारस्थघटानुपलम्भवत् ।" उत्पन्नो गकारः" इत्यादिप्रत्ययस्तु" सोऽयं गकारः" इत्यादिप्रत्यभिज्ञाविरोधादप्रमाणम् । वर्णाभिव्यञ्जक - ध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा । तस्मान्न वेदानां क्षणिकत्वम् ।

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति तव सिद्धान्तो भज्येत इति चेत्  न । न हि तावत् पुरुषेण उच्चार्यमाणत्वं पौरुषेयत्वम्  गुरुमतेऽप्यध्यापकपरम्परया पौरुषेयत्वापत्तेः । नापि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वम् नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिना सिद्धसाधनापत्तेः । किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम् । तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारण -

अनपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य । भारतादीनान्तु
सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम् ।
एवं पौरुषेयापौरुषेयभेदेन द्विविध आगमो निरूपितः ।
इति वेदान्तपरिभाषायामागमपरिच्छेदः ।

## ५ अर्थापत्तिः ।

इदानीमर्थापत्तिर्निरूप्यते । तत्रोपपाद्यज्ञानेनोपपादककल्पन - मर्थर्थाप्त्तिः । तत्रोपपाद्यज्ञानं करणम्  उपपादकज्ञानं फलम् । येन विना यदनुपपन्नं तत् तत्रोपपाद्यम् । यस्याभावे यस्यानुपपत्तिः तत् तत्रोपपादकम् । यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नम्  इति तादृशं पीनत्वमुपपाद्यम्   यथा वा रात्रिभोजनस्याभावे तादृश - पीनत्वस्यानुपपत्तिः  इति रात्रिभोजनमुपपादकम् ।

सा चार्थापत्तिर्द्विविधा - दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति । तत्र दृष्टार्थापत्तिर्यथा " इदं रजतम् " इति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य " नेदं रजतम् " इति तत्रैव निषिध्यमानत्वं सत्यत्वऽनुपपन्नम्  इति रजतस्य सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयति । श्रुतार्थापत्तिर्यथा  यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेन अर्थान्तरकल्पनम् । यथा " तरति शोकमात्मवित् " इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथा - नुपपत्या बन्धस्य मिथ्यात्वं कल्पते । यथा वा " जीवी देवदत्तो " गृहे न " इति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति ।

श्रुतार्थापत्तिश्च द्विविधा - अभिधानानुपपत्तिः अभिहितानुपपत्तिश्च । तत्र यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्या अन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः । यथा ' द्वारम् ' इत्यत्र ' पिधेहि ' इति पदाध्याहारः  यथा वा " विश्वजिता विजेत " इत्यत्र ' स्वर्गकाम ' - पदाध्याहारः ।

ननु ' द्वारम् ' इत्यादावन्वयाभिधानात् पूर्वम् इदमन्वयाभिधानं पिधानापस्थापकपदं विनाऽनुपापन्नमिति कथं ज्ञानमिति चेत्  न

' अभिधान ' - पदेन करणव्युत्पत्या तात्पर्यस्य विवक्षितत्वात् । तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते ।

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र द्रष्टव्या । तथा " स्वर्गकामो ज्योतिष्टोमेन यजेत " इत्यत्र स्वर्गसाधनत्वस्य क्षणिकयागगततयाऽवगतस्या - नुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते ।

न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्वयव्यप्त्य - ज्ञानेनान्वयिन्यनन्तर्भावात् । व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तम् । अत एवार्थापत्तिस्थले ' अनुमिनोमि ' इति नानुव्यवसायः किन्तु " अनेन इदं कल्पयामि " इति ।

ननु अर्थापत्तिस्थले " इदमनेन विनाऽनुपपन्नमिति ज्ञानकरणम् " इत्युक्तम् तत्र किमिदं " तेन विनाऽनुपपन्नत्वम् " । तदभावव्यपकाभावप्रतियोगित्वमिति ब्रूमः ।

एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकि नानुमानान्तरम् " पृथिवीतरेभ्यो भिद्यते " इअत्यादौ गन्धवत्त्वमितरभेदं विनाऽनुपपन्नमित्यादिज्ञानस्य करणत्वात् । अत एवानुव्यवसायः " पृथिव्यामितरभेदं कल्पयामि " इति ।

इति वेदान्तपरिभाषायामर्थापत्तिपरिच्छेदः ।

## ६ अनुपलब्धि ।

इदानीं षष्ठं प्रमाणं निरूप्यते । ज्ञानकरणाजन्याभावानुभवा - साधारणकारणमनुपलब्धिरूपं प्रमाणम् । अनुमानादिजन्या - तीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तं पदम् । अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणायासधारणेति । अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेति विशेषणम् । न चातीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्ध्यैवाभावो गृह्यताम् विशेषाभावादिति वाच्यम् । धर्माधर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावाग्राहकत्वात् ।

ननु केयं योग्यानुपलब्धिः । किं योग्यस्य प्रतियोगिनोऽनुपलब्धिः । उत योग्येऽधिकरणे प्रतियोगिनोऽनुपलब्धिः । नाद्यः स्तम्भे

पिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः । नान्त्यः आत्मनि धर्माद्य -
भावस्यापि प्रत्यक्षत्वापत्तेरिति चेत् न " योग्या चासावनुप -
लब्धिश्चेति " कर्मधारयाश्रयणात् । अनुपलब्धेर्योग्यता च
तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम् । यस्याभावो
गृह्यते तस्य यः प्रतियोगी तस्य सत्त्वेनाधिकरणे तर्कितेन
प्रसञ्जनयोग्यमापादनयोग्यं प्रतियोग्युपलब्धिस्वरूपं यस्य
अनुपलम्भस्य तत्त्वं तदनुपलब्धेर्योग्यत्वमित्यर्थः । तथाहि -
स्फीतालोकवति भूतले यदि घटः स्यात् तदा घटोपलम्भः
स्यादित्यापादनसम्भवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः ।
अन्धकारे तु तादृशापादनासम्भवान्नानुपलब्धिगम्यता । अत
एवस्तम्भे तादात्म्येन पिशाचसत्त्वे स्तम्भवत् प्रत्यक्षत्वापत्त्या
तदभावोऽनुपलब्धिगम्यः । आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया
निरुक्तोपलम्बापादनासम्भवात् न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्।

ननूक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले अभावस्याउपलब्धिगम्यत्वं
त्वदनुमतम् । तत्र क्लृप्तेन्द्रियमेवाभावाकारवृत्तावपि करणम्
इन्द्रियान्वयव्यतिरेकानुविधानादिति चेत् न । तत्प्रतियोग्यनुपलब्धे -
रप्यभावग्रहे हेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात् ।
इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्
इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ।

ननु " भूतले घटो न " इत्याद्यभावानुभवस्थले भूतलांशे
प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन
भूतलावच्छिन्नचैतन्यवत् तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि
प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपि इति
चेत् सत्यम् अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्कारणस्यानुप -
लब्धेर्मानान्तरत्वात् । न हि फलीभूतज्ञानस्य प्रत्र्यक्षत्वे
तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति । " दशमस्त्वमसि "
इत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य
वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात् ।

फलवैजात्यं विना कथं प्रमाणभेद इति चेत् न वृत्तिवैजात्यमात्रेण
प्रमाणवैजात्योपपत्तेः । थथा च घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्या
इन्द्रियस्य विषयेणासन्निकर्षात् किन्तु घटाद्यनुपलब्धिरूप -

मानान्तरजन्येति भवत्यनुपलब्धेर्मानान्तरत्वम् ।

ननु अनुपलब्धिरूपमानान्तरपक्षेऽभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्वचनीय - घटाभावोऽभ्युपगम्येत । न चेष्टापत्तिः तस्य मायोपादानक - त्वेऽभावत्वानुपपत्तेः मायोपादानकत्वाभावे मायायाः सफलकार्योपादानत्वानुपपत्तिरिति चेत् न । घटवति घटाभावभ्रमोन तत्कालोत्पन्नघटाभावविषयकः किन्तु भूतलरूपादौ विद्यमानो लौकिको घटाभावो भूतले आरोप्यते इत्यन्यथाख्यातिरेव आरोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात् ।

अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले तदभावस्यानिर्वचनीयत्वम् तथापि तदुपादानं मायैव । नह्युपादानोपादेययोरत्यन्तसाजात्यम् तन्तुपटयोरपि तन्तुत्वपटत्वादिना वैजात्यात् यत्किञ्चित्साजात्यस्य मायया अनिर्वचनीयघटाभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात् । अन्यथा व्यावहारिकं घटाभावं प्रति कथं मायोपादानमिति कुतो नाशङ्कथाः । न च विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यम् प्रपञ्चविभ्रमाधिष्ठानत्वरूपस्य तस्येष्टत्वात् परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनुपपत्तेः । तथा च प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्म इति सिद्धान्त इत्यलमतिप्रसङ्गेन ।

स चाभावश्चतुर्विधः - प्रागभावः प्रध्वंसाभावोऽत्यन्त अभावोऽन्योन्याभावश्चेति । तत्र मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्वं योऽभावः स प्रागभावः । स च भविष्यतीति प्रतीतिविषयः । तत्रैव घटस्य मुद्गरपातानन्तरं योऽभावः स प्रध्वंसाभावः । ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव । न च घटोन्मज्जनापत्तिः घटध्वंसध्वंसस्यापि घटप्रतियोगिक - ध्वंसत्वात् । अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः । न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यम् । तादृशमधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धम् ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यताया वक्ष्यमाणत्वात् । यदि च ध्वंसाधिकरणं चैतन्यं तदाऽसिद्धिः आरोपितप्रतियोगिक -

ध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात् ।
तदुक्तम् - " अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः " इति
एवं शुक्तिरूप्यविनाशोऽपीदमवच्छिन्नचैतन्यमेव ।

यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः । यथा
वायौरूपात्यन्ताभावः । सोऽपि वियदादिवत् ध्वंसप्रतियोग्येव ।
" इदमिदं न " इति प्रतीतिविषयोऽन्योन्याभावः । अयमेव विभागो
भेदः पृथक्त्वं चेति व्यवह्रियते भेदातिरिक्तपृथक्त्वादौ प्रमाणाभावात् ।
अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः यथ घटे पटभेदः
अधिकरणस्यानादित्वेऽनादिरेव यथा जीवे ब्रह्मभेदः ब्रह्मणि वा
जीवभेदः । द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव अविद्यानिवृत्तौ
तत्परतन्त्राणां निवृत्त्यवश्यम्भावात् ।

पुनरपि भेदो द्विविधः - सोपाधिको निरुपाधिकश्चेति । तत्रोपाधि -
सत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वम् । तच्छून्यत्वं निरुपाधिकत्वम् ।
तत्राद्यो तथा एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः । यथा वा
एकस्य सूर्यस्य जलभाजनभेदेन भेदः । तथा च ब्रह्मणोऽन्तःकरण -
भेदाद्भेदः । निरुपाधिकभेदो यथा घटे पटभेदः ।

न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः तात्त्विक -
भेदानभ्युपगमेन वियदादिवदद्वैताव्याघातकत्वात् । प्रपञ्चस्याद्वैते
ब्रह्मणि कल्पितत्वाङ्गीकारात् ।तदुक्तं सुरेश्वराचार्यैः -

" अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥"

इति । अत एव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तत्वविशेषणम्
तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्व-विशेषणं च सङ्गच्छते ।

एवं चतुर्विधानामभावानां योग्यानुपलब्ध्या प्रतीतिः ।
तत्रानुपलब्धिर्मानान्तरम् ।

एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च ।
तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति
तत्प्रकारकज्ञानत्वं प्रामाण्यम् । तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं
न त्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् । नापि
प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः रूपादिप्रत्यक्षे
आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् " पीतः शङ्खः "
इति प्रत्यक्षस्य भ्रमत्वाच्च । अत एव न सल्लिङ्गपरामर्षादिक -

मप्यनुमित्यादिप्रमायां गुणः असल्लिङ्गपरामर्षादिस्थलेऽपि विषयाबाधेनानुमित्यादेः प्रमात्वात् । न चैवमप्रमाप प्रमा स्यात् ज्ञासामान्यसामग्र्या अविशेषादिति वाच्यम् । दोषाभावस्यापि हेतुत्वाङ्गीकारात् । न चैवं परतस्त्वम् आगन्तुकभाकारणापेक्षायामेव परतस्त्वात् ।

ज्ञायते च प्रामाण्यं स्वतः । स्वतो ग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानम् तद्ग्राहकं साक्षिज्ञानम् । तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते । न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटित - स्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् । यद्वा यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वम् । संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः ।

अप्रामाण्यन्तु न ज्ञानसामान्यसामग्रीप्रयोज्यम् प्रमाया - मप्यप्रामाण्यापत्तेः किन्तु दोषप्रयोज्यम् । नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम् अप्रामाण्यघटकतदभाववत्त्वादे - र्वृत्तिज्ञानानुपनीतत्वेन साक्षिणाग्रहीतुमशक्यत्वात् । किन्तु विसंवादिप्रवृत्त्यादिकिङ्गकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते च ।

इति वेदान्तपरिभाषायामनुपलब्धिपरिच्छेदः ।

---

## ७ प्रामाण्यम् ।

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम् - व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति । तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वप्रमाणानामाद्यं प्रामाण्यम् तद्विषयाणां व्यवहारदशायां बाधाभावात् । द्वितीयन्तु जीवब्रह्मैक्यपराणां " सदेव सोम्येदमग्र आसीत् " इत्यादिनां " तत्त्वमसि " इत्यन्तानाम् तद्विषयस्य जीवपरैक्यस्य कालत्रयांबाध्यत्वात् । तच्चैक्यं ' तत्त्वं ' - पदार्थज्ञानाधीन- ज्ञानमिति प्रथमं ' तत् ' - पदार्थौ लक्षणप्रमाणाभ्यां निरूप्यते ।

तत्र लक्षणं द्विविधम् - स्वरूपलक्षणं तटस्थलक्षणं चेति ।

तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम् । यथा सत्यादिकं ब्रह्मस्वरूपलक्षणम् " सत्यं ज्ञानमनन्तं ब्रह्म , " " आनन्दो ब्रह्मेति व्यजानात् " इत्यादिश्रुतेः । ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणत्वमिति चेत् न स्वस्यैव स्वापेक्षया धर्मिधर्म - भावल्पनया लक्ष्यलक्षणत्वसम्भवात् । तदुक्तम् - " आनन्दो विषयानुभवओ नित्यत्वं चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते " इति ।

तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव । यथा गन्धवत्वं पृथिवीलक्षणम् महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च गन्धाभावात् । प्रकृते च जगज्जन्मादिकारणत्वम् । अत्र ' जगत् ' - पदेन कार्यजातं विवक्षितम् । कारणत्वं च कर्तृत्वम् अतोऽविद्यादौ नातिव्याप्तिः । कर्तृत्वं च तत्तदुपादान - गोचरापरोक्षज्ञानचिकिर्षाकृतिमत्वम् । ईश्वरस्य तावदुपादानगोचरा - परोक्षज्ञानसद्भावे - " यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते । " इत्यादिश्रुतिर्मानम् । तादृशचिकीर्षासद्भावे च " सोऽकामयत बहु स्यां प्रजायेय " इत्यादिश्रुतिर्मानम् । तादृशकृतौ च " तन्मनोऽकुरुत " इत्यादिवाक्यम् ।

ज्ञानेच्छाद्यन्यतमगर्भं लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः । अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवं च लक्षणानि नव सम्पद्यन्ते । ब्रह्मणो जगज्जन्मादिकरणत्वे च ' यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति " इत्यादिश्रुतिर्मानम् ।

यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम् । उपादानत्वं च जगदध्यासाधिष्ठानत्वम् जगदाकारेण परिणममानमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य " इदं सर्वं यदयमात्मा " " सच्च त्यच्चाभवत् " " बहु स्यां प्रजायेय " इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः । " घटः सन् " " घटो भाति " " घत इष्टः " इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूप- ब्रह्मैक्याध्यासात् ।

नन्वानन्दात्मकचिदध्यासाद्घटादेरिष्टत्वव्यवहारे दुःखस्यापि

तत्राध्यासात् तस्यापीष्टत्वव्यवहारापत्तिरिति चेत् न " आरोपे
सति निमित्तानुसरणम् न तु निमित्तमस्तीत्यारोपः" इत्यभ्युपगमेन
दुःखादौ सच्चिदंशाध्यासेऽपि आनन्दांशाध्यासाभावात्। जगति
नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात्।
तदुक्तम् -

" अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" इति॥

अथ जगतो जन्मक्रमो निरूपते। तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितानिरूपित - शक्तिविशेषविशिष्टमायासहितः सन् नामरूपात्मकनिखिलप्रपञ्चं प्रथं बुद्धावाकलय्य" इदं करिष्यामि" इति सङ्कल्पयति " तदैक्षत बहु स्यां प्रजायेय" " सोऽकामयत बहु स्यां प्रजायेय" इत्यादि श्रुतेः। तत आकाशादीनि पञ्चभूतान्यपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यान्युत्पद्यन्ते। तत्राकाशस्य शब्दो गुणः वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपां तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः। न तु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात्। न चासौ भ्रमः बाधकाभावात्।

इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि। गुणाः सत्त्वरजस्तमांसि। एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं श्रोत्रत्वक्चक्षू - रसनघ्राणानि प्ञ्चज्ञानेन्द्रियाणि जायन्ते। एतैरेव सत्त्वगुणोपेतैः पञ्च - भूतैर्मिलितैर्मनोबुद्ध्याहङ्कारचित्तनि जायन्ते। श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरुणाश्विनोधिष्टातृदेवताः। मन आदीनां चतुर्णा क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्टातृदेवताः। एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते। तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृ - देवताः। रजोगुणोपेतैः पञ्चभूतैरेव मिलितैः पञ्च वायवः प्राणापनव्यानोदान - समानाख्या जायन्ते। तत्र प्राग्गमनवान् वायुः प्राणो नासादिस्थानवर्ती। अर्वाग्गमनवानपानः पाय्वादिस्थानवर्ती। विष्वगमनवान् व्यानः अखिलशरीरवर्ती। ऊर्ध्वगमनवानुत्क्रमणवायुरुदानः कण्ठस्थानवर्ती।

अशितपीतान्नादिसमीकरणकरः समानः नाभिस्थानवर्ती ।
तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते ।
" तासां त्रिवृतं त्रिवृतमेकैकां
करवाणि" इति श्रुतेः पञ्चीकरणोपलक्षणर्थत्वात् ।
पञ्चीकरणप्रकारश्चेत्थम् - आकाशमादौ द्विधा विभज्य
तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां
वाय्वादिषु चतुर्षु भूतेषु संयोजनम् । एवं वायुं द्विधा विभज्य
तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामांशानामाकाशादिषु
संयोजनम् । एवं तेज आदीनामपि । तदेवमेकैकभूतस्यार्धं
स्वांशात्मकम् अर्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु
स्वांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् - " वैशेष्यात्तु
तद्वादस्तद्वादः" इति ।
पूर्वोक्तैरपञ्चीकृतभूतैत्लिङ्गशरीरं परलोकयात्रानिर्वाहकं
मोक्षपर्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चक -
कर्मेन्द्रियपञ्चक - प्राणदिपञ्चकसंयुक्तं जायते । तदुक्तम् -
" पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥" इति ।
तच्च द्विविधम् - परमपरं च । परं हिरण्यगर्भलिङ्गशरीरम्
अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरम्
महत्तत्त्वम् अस्मदादिलिङ्गशरीरं चाहङ्कार इत्याख्यायते ।
एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्मह -
र्जनतपःसत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलवितलसुतल-
तलातलरसातलमहातलपातालाख्यस्य अधोलोकसप्तकस्य ब्रह्माण्डस्य
जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणां चोत्पत्तिः ।
तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादिशरीराणि ।
अण्डजान्यण्डेभ्योजातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि
स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिनुद्भिद्य
जातानि वृक्षादीनि । वृक्षादीनामपि पापफलभोगायतनत्वेन
शरीरत्वम् ।
तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेत -
लिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्

कर्तृत्वम्  इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भादिद्वारा
" हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणि"  इति श्रुतेः ।

हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः ।

" स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥"

" हिरण्यगर्भः समवर्तताग्रे"  इत्यादिश्रुतेः ।
एवं भूतभौतिकसृष्टिर्निरूपिता ।

इदानीं प्रलयो निरूप्यते । प्रलयो नाम त्रैलोक्यविनाशः । स च चतुर्विधः - नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति । तत्र नित्यः प्रलयः सुषुप्तिः  तस्याः सकलकार्यप्रलयरूपत्वात् । धर्माधर्म - पूर्वसंस्काराणां च तदा कारणात्मनाऽवस्थानम् । तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः  न वा स्मरणानुपपत्तिः । न च सुषुप्तौ अन्तःकरणस्य विनाशे तदधीनप्राणादिक्रियानुपपत्तिः  वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत् । न च एवं सुप्तस्य परेतादविशेषः  सुप्तस्य हि लिङ्गशरीरं संस्कारात्मनाऽत्रैव वर्तते  परेतस्य तु लोकान्तरे इति वैलक्षण्यात् ।

यद्वा अन्तःकरणस्य द्वे शक्ति - ज्ञानशक्तिः क्रियाशक्तिश्चेति । तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तऊ विनाशः  न तु क्रियाशक्तिविशिष्टस्य इति प्राणद्यवस्थानमविरुद्धम् । " यदा सुप्तः स्वप्नं न कञ्चन पश्यति  अथास्मिन् प्राण एवैकधा भवति अथैनं वाक् सर्वैर्नामभिः सहाप्येति"  " सता सोम्य तदा सम्पन्नो भवति  स्वमपीतो भवति"  इत्यादिश्रुतिरुक्तसुषुप्तौ मानम् ।

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यविनाशः । यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य ब्रह्मणो ब्रह्माण्डाधिकार - लक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः  तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम् ।

" ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥"  इति स्मृतेः ।

एवं स्वलोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्ड

तदन्तर्वर्तिनिखिललोक  तदन्तर्वर्तिस्थावरादीनां भौतिकानां भूतानां च प्रकृतौ मायायां लयः  न तु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात्  अतः प्राकृत इत्युच्यते ।

कार्यब्रह्मणो दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः । ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितकालः " चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते"  इत्यादिवचनात् । प्रलयकालोऽपि दिवसकालपरिमितः  रात्रिकालस्य दिवसकालतुल्यत्वात् ।

प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि ।

" द्विपरार्धे त्वतिक्रान्ते ब्रह्मणह् परमेष्ठिनः ।
तदा प्रकृतयः सप्त कल्यन्ते प्रलयाय हि ॥

एष प्राकृतिको राजन् प्रलयो यत्र लीयते ।"
इति वचनं प्राकृतप्रलये मानम् ।

" एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ।
शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम् ।"
इति वचनं नैमित्तिकः प्रलये मानम् ।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः । स चैकजीववादे युगपदे  नानाजीववादे तु क्रमेण । " सर्व एकीभवन्ति"  इत्यादिश्रुतेः ।

तत्राद्यास्त्रयोऽपि लयाः कर्मोपरमनिमित्ताः तुरीयस्तु ज्ञानोद्यनिमित्तो लयोऽज्ञानेन सहैवेति विशेषः ।

एवं चतुर्विधप्रलयो निरूपितः । तस्यदानीं क्रमो निरूप्यते । भूतानां भौतिकानां च न कारणलयक्रमेण लयः  कारणलयसमये कार्याणामाश्रयमन्तरेणावस्थानानुपपत्तेः  किन्तु सृष्टिक्रमविपरीतक्रमेण । तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात् । अन्यथा न्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः । तथा च पृथिव्या अप्सु  अपां तेजसि  तेजसो वायौ  वायोराकाशे  आकाशस्य जीवाहङ्कारे तस्य हिरण्यगर्भाहङ्कारे  तस्य चाविद्यायाम् - इत्येवंरूप एव प्रलयः । तदुक्तं विष्णुपुराणे -

" जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।

तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मनिष्कले सम्प्रलीयते" इति ।
एवंविधप्रलयकारणत्वं 'तत्' - पदार्थस्य ब्रह्मणस्तटस्थलक्षणम् ।

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं स्यात् अन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तिरिति चेत् न । न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यम् किन्तु अद्वये ब्रह्मण्येव । तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः । इत्थम् - यदि सृष्टिमनुपन्यस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात् । ततः सृष्टिवाक्याद्ब्रह्मोपादेयत्वज्ञाने सति उपादानं विना कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां "नेति नेति" इत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपपादनेन प्रपञ्चस्य तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिद्धतीति परम्परया सृष्टिवाक्यानामपि अद्वितीये ब्रह्मण्येव तात्पर्यम् । उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानां च उपासनाविध्यपेक्षितगुणारोपमात्रपरत्वम् न गुणपरत्वम् । निर्गुणप्रकरणपठितानां सगुणवाक्यानान्तु निषेधवाक्या - पेक्षितनिषेध्यसमर्पकत्वेन विनियोग इति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते ।

तदेवं स्वरूपतटस्थलक्षणलक्षितं 'तत्' पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बरूपमिति केचित् । तेषामयमाशयः - जीवपरमेश्वर - साधारणं चैतन्यमात्रं बिम्बम् तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बमीश्वरचैतन्यम् अन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम् "कार्योपाधिरयं जीवः कारणोपदिरीश्वरः" इति श्रुतेः । एतन्मते जलाशयगतशरावजलगतसूर्यप्रतिबिम्बयोरिव जीवपरमेश्वरयोर्भेदः । अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम् । अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम् ।

एतन्मतेऽविद्याकृतदोषा जीव इव परमेश्वरेऽपि स्युः उपाधेः

प्रतिबिम्बपक्षपातित्वात् इत्यस्वरसात् बिम्बात्मकमीश्वरचैतन्यमित्यपरे ।
तेषामयमाशयः - एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यम्
प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम् । बिम्बप्रतिबिम्बकल्पनोपाधिश्चैक -
जीववादे अविद्या अनेकजीववादे तु अन्तःकरणान्येव । अविद्यान्तः -
करणरूपोपाधिप्रयुक्तो जीवपरभेदः । उपाधिकृतदोषाश्च प्रतिबिम्बे
जीव एव वर्तन्ते न तु बिम्बे परमेश्वरे उपाधेः प्रतिबिम्बपक्षपातित्वात् ।
एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव
जीवपरयोर्भेदः ।

ननु ग्रीवस्थमुखस्य दर्पणप्रदेश इव बिम्बचैतन्यस्य परमेश्वरस्य
जीवप्रदेशेऽभावात् तस्य सर्वान्तर्यामित्वं
न स्यादिति चेत् , न । साभ्रनक्षत्र-
स्याकाशस्य जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेश-
सम्बन्धदर्शनेन परिच्छिन्नाबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽप्य-
परिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशसम्बन्धाविरोधात् ।

न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः, रूपवत एव
तथात्वदर्शनात्, इति वाच्यम् ; नीरूपस्यापि रूपस्य प्रतिबिम्ब-
दर्शनात् । न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः,
आत्मनो द्रव्यत्वाभावस्य उक्तत्वात् ।
" एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।"
"यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् ।"
इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वाच्च ।
तदेवं "तत्" - पदार्थो निरूपितः ।

इदानीं "त्वम्"-पदार्थो निरूप्यते । एकजीववादेऽविद्याप्रतिबिम्बो
जीवः , अनेकजीववादे तु अन्तःकरणप्रतिबिम्बः । स च जाग्रत्स्वप्न-
सुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रद्दशा नाम इन्द्रियजन्यज्ञानावस्था,
अवस्थान्तरे इन्द्रियाभावात् नातिव्याप्तिः । इन्द्रियजन्यज्ञानं च
अन्तःकरणवृत्तिः , स्वरूपज्ञानस्यानादित्वात् ।

सा चान्तःकरणवृत्तिरावरणाभिभवार्था इत्येकं मतम् ।
तथा हि- अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठान-
चैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ
घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थ-
पदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः,

अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये, तद्भङ्गजनकं न चैतन्यमात्रम् , तद्भासकस्य तदनिवर्तकत्वात् , नापि वृत्त्युपहितं चैतन्यम् , परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य, तदुपहितचैतन्यस्य वा, आवरणभञ्जकत्वम् , इति आवरणाभिभवार्था वृत्तिरुच्यते ।

सम्बन्धार्था वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिकोऽपरिच्छिन्नो जीवः । स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति, घटादीना समं सम्बन्धाभावात् , तत्तदाकारवृत्तिदशायां तु भासयति, तदा सम्बन्धसत्त्वात् ।

ननु अविद्योपाधिकस्यापरिच्छिन्नस्य जीवस्य स्वत एव समस्तवस्तुसम्बधस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम् , असङ्गत्वदृष्ट्या सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यात् , इति चेत् , उच्यते । न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः । किन्तर्हि ? घटादिभानप्रयोजकं सम्बन्धविशेषम् । स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्य-व्यञ्जकतालक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः । तथा हि - तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थम् । घटादिकस्तु न तथा, अस्वच्छ-द्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्य-धर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यतश्रयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति । तदुक्तं विवरणे - "अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयति" इति । दृष्टं चास्वच्छद्रव्यस्यपि स्वच्छद्रव्यसम्बन्धदशायां प्रतिबिम्बग्राहित्वम् । तथा कुड्यादेर्जलादिसंयोगदशायां मुखादि-प्रतिबिम्बग्राहिता । घटादेरभिव्यञ्जात्वं च तत्प्रतिबिम्बग्राहित्वम् , चैतन्यस्याभिव्यक्तत्वं च तत्र प्रतिबिम्बितत्वम् ।

एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेववृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकार । परोक्षस्थले तु वह्न्यादेर्वृत्तिसंसर्गाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम् । एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम् ।

एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम् ।

इदानीं परिच्छिन्नत्वपक्षे सम्बधार्थत्वं निरूप्यते । तथा हि -
अन्तःकरणोपाधिको जीवः । तस्य न घटाद्युपादानता, घटादिदेशसम्बन्धात् ।
किन्तु ब्रह्मैव घटाद्युपादानम् , तस्य मायोपहितस्य सकलघटाद्यन्वयित्वात् ।
अत एव ब्रह्मणः सर्वज्ञ्नता । तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्या-
भेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते ,
तदवभासाय घटाद्यधिष्ठानब्रह्म-
चैतन्याभेदसिद्ध्यर्थं घटाद्याकारवृत्तिरिष्यते ।
ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः
सम्पाद्यते, घटानःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययो -
रभेदासम्भवात् , इति चेत् , ने । वृत्तेर्बहिर्देशनिर्गमनाङ्गीकारेण
वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपधेयभेदाभावस्य
उक्तत्वात् । एवमपरोक्षस्तहले वृत्तेर्मतभेदेन विनियोग उपपादितः ।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था ।
जाग्रदवस्थाव्यावृत्त्यर्थम् " इन्द्रियाजन्ये " ति । अविद्यावृत्तिमत्यां
सुषुप्तावतिव्याप्तिवारणाय " अन्तःकरणे " ति । सुषुप्तिर्नाम अविद्या -
गोचराविद्यावृत्त्यवस्था । जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न
तत्रातिव्याप्तिः । अत्र केचिन्मरणभूर्छयोरवस्थान्तरत्वमाहुः, अपरे
तु सुषुप्तावेव तयोरन्तर्भावमाहुः । तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोः
" त्वं " - पदार्थनिरूपणे उपयोगाभावात् न तत्र प्रयत्यते ।

तस्य मायोपाध्यपेक्षया एकत्वम् , अन्तःकरणोपाध्यपेक्षया च
नानात्वं व्यवह्रियते । एतेन जीवस्याणुत्वं प्रत्युक्तम् ,
" बुद्धेर्गुणेन चैवं ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः । "
इत्यादौ जीवस्य " बुद्धि " - शब्दवाच्यान्तःकरणपरिणामोपाधिकस्य
परमाणुत्वश्रवणात् ।

स च जीवः स्वयंप्रकाशः , स्वप्नावस्थामधिकृत्य " अत्रायं पुरुषः
स्वयं ज्योतिः " इति श्रुतेः । अनुभवरूपश्च , " प्रज्ञानघन एव "
इत्यादिश्रुतेः । " अनुभवामि " इति व्यवहारस्तु वृत्ति प्रतिबिम्बित-
चैतन्यमादाय उपपद्यते ।

एवं " त्वं " - पदार्थो निरूपितः ।

अधुना ' तत् - त्वम् " - पदार्थयोरैक्यं महावाक्यप्रतिपाद्य -

मभिधीयते । ननु " नाहमीश्वरः " इत्यादिप्रत्यक्षेण ,
किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धधर्माश्रयत्वादिलिङ्गेन ,
" द्वा सुपर्णा " इत्यादिश्रुत्या -
" द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ "
इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन " तत्त्वमस्या " -
दिवाक्यम् " आदित्यो यूपः , " " यजमानः प्रस्तरः "
इत्यादिवाक्यवदुपचरितार्थमेव, इति चेत् , न । भेदप्रत्यक्षस्य
सम्भावितकरणदोषस्यासम्भावितदोषवेदजन्यज्ञानेन
बाध्यमानत्वात् । अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिः -
शास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः । पाकरक्ते
घटे " रक्तोऽयम् , न श्यामः " इतिवत् " सविशेषणे हि "
इति न्यायेन जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्म -
भेदविषयत्वाच्च । अत एव नानुमानमपि प्रमाणम् ,
आगमविरोधात् , मेरुपाषाणमयत्वानुमानवत् ।

नाप्यागमान्तरविरोधः । तत्परातत्परवाक्ययोस्तत्परवाक्यस्य
बलवत्वेन लोकसिद्धभेदानुवादि - " द्वा सुपर्णौ " त्यादि -
वाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्य
" तत्त्वमस्या " दिवाक्यस्य प्रबलत्वात् । न च जीवपरैक्ये
विरुद्धधर्माश्रयत्वानुपपत्तिः , शीतस्यैव जलस्यौपाधिकौष्ण्याश्रयत्ववत्
स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिक -
कर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः । यदि च जलादावौष्ण्यमारोपितम् ,
तदा प्रकृतेऽपि तुल्यम् । न च सिद्धान्ते कर्तृत्वस्य क्वचिदप्यभावा -
दारोप्यप्रमाहितसंस्काराभावे कथमारोपः , इति वाच्यम् ,
लाघवेनारोप्यविषयकसंकारत्वेनैव तस्य हेतुत्वात् । न च
प्राथमिकारोपे का गतिः , कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात् ।

तत्र ' तत्त्वम् ' - पदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि
लक्ष्यस्वरूपयोरैक्यमुपपादितमेव । अत एव तत्प्रतिपादक -
" तत्त्वमस्या " दिवाक्यानामखण्डार्थत्वम् , " सोऽयम् "
इत्यादिवाक्यवत् । न च कार्यपराणामेव प्रामाण्यम् , " चैत्र ,
पुत्रस्ते जातः " इत्यादौ सिद्धेऽपि सङ्गतिग्रहात् ।

एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धम् ।

इति वेदान्तपरिभाषायां विषयपरिच्छेदः ।

## ८ प्रयोजनम् ।

इदानीं प्रयोजनं निरूप्यते । यदवगतं सत् स्ववृत्तितया इष्यते तत्प्रयोजनम् । तच्च द्विविधम् - मुख्यं गौणं चेति । तत्र सुखदुःखाभावौ मुख्ये प्रयोजने , तदन्यतरसाधनं गौणं प्रयोजनम् । सुखं च द्विविधम् - सातिशयं नितातिशयं च । तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः , " एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इत्यादि श्रुतेः । निरतिशयं सुखं च ब्रह्मैव , " आनन्दो ब्रह्मेति व्यजानात् , " विज्ञानमानन्दं ब्रह्म " इत्यादि श्रुतेः ।

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः , शोकनिवृत्तिश्च , " ब्रह्म वेद ब्रह्मैव भवति , " " तरति शोकमात्मवित् " इत्यादि श्रुतेः । न तु लोकान्तरावाप्तिः , तज्जन्यवैषयिकानन्दो वा मोक्षः , तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः ।

ननु त्वन्मतेऽप्यानन्दावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः , अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेत् , न , सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः । अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्म - स्वरूपतया सिद्धैव । लोकेऽपि प्राप्तप्राप्ति - परिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव । यथा हस्तगत्विस्मृतसुवर्णादौ " तव हस्ते सुवर्णम् " इत्याप्तोपदेशादप्राप्तमिव प्राप्नोति । यथा वा वलयितचरणायां स्रजि सर्पत्वभ्रमवतः " नायं सर्पः " इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः । एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः , परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः प्रयोजनं च ।

स च ज्ञानैकसाध्यः , " तमेव विदित्वाऽतिमृत्युमेति , नान्यः पन्था विद्यतेऽयनाय " इति श्रुतेः , अज्ञाननिवृत्तेः ज्ञानैकसाध्यत्व - नियमाच्च । तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम् , " अभयं

वै जनक प्राप्तोऽसि , " " तदात्मानमेवावेत् - अहं ब्रह्मास्मि "
इत्यादि श्रुतेः , " तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य
साधनम् " इति नारदीयवचनाच्च ।

तच्च ज्ञानमपरोक्षरूपम् , परोक्षत्वेऽपरोक्षभ्रमनिवर्तक - त्वानुपपत्तेः । तच्चापरोक्षज्ञानं " तत्त्वमस्या " दिवाक्यादिति केचित् , मनननिदिध्यासनसंस्कृतान्तःकरणादेवेत्येपरे ।

तत्र पूर्वाचार्याणामाशयः - संविदापरोक्ष्यं न करणविशेषोत्पत्ति - निबन्धनम् , किन्तु प्रमेयविशेषनिबन्धनम् इत्युपादितम् । तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यमपि ज्ञानमपरोक्षम् । अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति " प्राणोऽस्मि प्रज्ञात्मा , तं मामायुरमृतमुपास्व " इति
इन्द्रप्रोक्तवाक्ये ' प्राण ' - शब्दस्य ब्रह्मपरत्वे
निश्चिते सति " मामुपास्व " इत्यशच्छाब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते " शास्त्रदृष्ट्या तूपदेशो
वामदेववत् " इत्यत्र सूत्रे शास्त्रीया दृष्टिः
शास्त्रदृष्टिः , " तत्त्वमस्या " दिवाक्यजन्यम् " अहं ब्रह्म "
इति ज्ञानं ' शास्त्रदृष्टि ' - शब्देनोक्तमिति ।

अन्येषां त्वेवमाशयः - करणविशेषनिबन्धनमेवज्ञानानां प्रत्यक्षत्वम् , न विषयविशेषनिबन्धनम् , एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात् । तथ च संवित्साक्षात्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम् । ब्रह्मसाक्षात्कारेऽपि मनन - निदिध्यासनसंस्कृतं मन एव करणम् , " मनसैवानुद्रष्टव्यम् "
इत्यादिश्रुतेः । मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया ।
न चैवं ब्रह्मण औपनिषदत्वानुपपत्तिः , अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात् ;
वेदानुपजीविमानान्तरगम्यत्वस्यैव विरोधित्वात् ।
' शास्त्रदृष्टि ' - सूत्रमपि ब्रह्मविषयकमानसप्रत्यक्षस्य शास्त्र[रयोज्यत्वादुपपद्यते । तदुक्तम् -

" ' अपि संराधने ' सूत्रात् शास्त्रार्थ ध्यानजा प्रमा ।
शास्त्रदृष्टिर्मता , तान्तु वेत्ति वाचस्पतिः परम् ॥"

तच्च ज्ञानं पापक्षयात् , स च कर्मानुष्ठानादिति
परम्परया
कर्मणां विनियोगः । अत एव " तमेतं वेदानुवचनेन
ब्राह्मणा
विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इत्यादि
श्रुतिः ,
" कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते " इत्यादि
स्मृतिश्च सङ्गच्छते ।

एवं श्रवणमनननिदिध्यासनान्यपि ज्ञानसाधनानि ,
मैत्रेयीब्राह्मणे " आत्मा वा अरे द्रष्टव्यः " इति
दर्शनमनूद्य
तत्साधनत्वेन " श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " इति
श्रवणमनननिदिध्यासनानां विधानात् । श्रवणं नाम
वेदान्तानामद्वितीये ब्रह्मणि त्तत्पर्यावधारणानुकूला
मानसी
क्रिया । मननं नाम शब्दावधारितेऽर्थे
मानान्तरविरोधशङ्कायां
तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारः ।
निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य
चित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकस्थैर्यानुकूलो
मानसो व्यापारः ।

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्
कारणम् , " ते
ध्यानयोगानुगता अपश्यन् , देवात्मशक्तिं
स्वगुणैर्निगूढाम् "
इत्यादि श्रुतेः । निदिध्यासने च मननं हेतुः ,
अकृतमननस्यार्थ -
दार्ढ्याभावेन तद्विषयकनिदिध्यासनायोगात् । मनने च
श्रवणं
हेतुः , श्रवणाभावे तात्पर्यानिश्चयेन
शाब्दज्ञानाभावेन

श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्च्यानुकूलमननायोगात् ।
एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या
ऊचिरे ।

अपरे तु श्रवणं प्रधानम् , मनननिदिध्यासनयोस्तु
श्रवणात्
पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया
आरादुपकारक -
तयाऽङ्गत्वमित्याहुः । तदप्यङ्गत्वं न
तार्तीयशेषत्वरूपम् ,
तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते
श्रुत्याद्यभावेऽसम्भवात् ।
तथा हि" ब्रीहिभिर्यजेत ," " दध्ना जुहोति"
इत्यादाविव
मनननिदिध्यासनयोरङ्गत्वे न काचित् तृतीया श्रुतिरस्ति ।
नापि" बर्हिर्देवसदनं दामि" इत्यादि मन्त्राणां
बर्हिःखण्डन -
प्रकाशनसामर्थ्यवत् किञ्चिल्लिङ्गमस्ति । नापि
प्रदेशान्तरपठितस्य
प्रव्गस्य" अग्निष्टोमे प्रवृणक्ति" इति वाक्यवत्
श्रवणानुवादेन
मनननिदिध्यासनविनियोजकं किञ्चिद्वाक्यमस्ति । नापि
" दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति
वाक्यावगतफल -
साधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीनामिव
फलसाधनत्वे -
नावगतस्य श्रवणस्य प्रकरणे मनननिदिध्यासनयोराम्नानम्
।

ननु ' द्रष्टव्यः ' इति दर्शनानुवादेन श्रवणे विहिते सति
फलवत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मनननिदिध्यासनयोः
प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेत् , न ," ते ध्यानयोगानुगता
अपश्यन्" इतादि श्रुत्यन्ते ध्यानस्य दर्शनसाधनत्वेनावगतस्य
अङ्गाकाङ्क्षायां प्रयाजन्ययेन श्रवणमननयोरेवाङ्गत्वापत्तेः ।

क्रमसमाख्ये च दूरनिरस्ते ।

किञ्च प्रयाजादिष्वङ्गत्वविचारः सप्रयोजनः । पूर्वपक्षे विकृतिषु न प्रयाजाद्यनुष्ठानम् ; सिद्धान्ते तु तत्रापि तदनुष्ठानमिति । प्रकृते तु श्रवणं न कस्यचित् प्रकृतिः , येन मननिदिध्यासनयो - स्तत्राप्यनुष्ठानमङ्गत्वविचारफलं भवेत् । तस्मान्न तार्तीयशेषत्वं मननिदिध्यासनयोः , किन्तु तथा घटादिकार्ये मृत्पिण्डादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः , तथा श्रवण - मननिदिध्यासनानामपीति मन्तव्यम् ।

सूचितं चैतद्विवरणाचार्यैः - " शक्तितात्पर्यविशिष्तशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति , प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् । मननिदिध्यासने तु चित्तस्यप्रत्यगात्मप्रवणता - संस्कारपरिनिष्पन्न - तदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितकारणस्य शक्तितात्पर्यविशिष्ट - शब्दावधारणस्य व्यवहिते मननिदिध्यासने तदङ्गे अङ्गीक्रियते । श्रवणादिषु च मुमुक्षूणामधिकारः , काम्ये कर्मणि फलकामस्याधिकारित्वात् । मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षासमाधानश्रद्धानां च विनियोगः । अन्तरिन्द्रियनिग्रहः शमः । बहिरिन्द्रियनिग्रहो दमः । विक्षेपाभाव उपरतिः । शीतोष्णादि - द्वन्द्वशनं तितिक्षा । चित्तैकाग्र्यं समाधानम् । गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा ।

अत्र ' उपरम ' - शब्देन संन्यासोऽभिधीयते ;
तथा च संन्यासिनामेव
श्रवणादावधिकारः , इति केचित् । अपरे तु ' उपरम ' - शब्दस्य संन्यासवाचकत्वाभावात् , विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात् , जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात् , सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः ।

सगुणोपासनमपि चित्तैकाग्र्यद्वारानिर्विशेषब्रह्मसाक्षात्कारहेतुः । तदुक्तम् -

" निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वरः ।
ये मन्दास्तेऽनुकम्प्यन्तेसविशेषनिरूपणैः ॥

वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।

तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ॥" इति ।
सगुणोपासकानां च अर्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणाद्युत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः ।
कर्मिणान्तु धूमादिमार्गेण पितृलोकं गतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिः । तथा च श्रुतिः - " रमणीयचरणा रमणीयां योनिमापद्यन्ते , कपूयचरणाः कपूयां योनिमापद्यन्ते" इति ।
प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोचित - तीव्रदुःखमनुभूय श्वशूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिः , इत्यलं प्रसङ्गागतप्रपञ्चेन ।

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनम् , " न तस्य प्राणा उत्क्रामन्ति " इति श्रुतेः , किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते ।

ननु " क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यादि श्रुत्या , " ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इत्यादि स्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेत् , न । " तस्य तावदेव चिरं यावन्न विमोक्ष्ये , अथ सम्पत्स्ये" इत्यादि श्रुत्या , " नाभुक्तं क्षीयते कर्म" इत्यादि स्मृत्या चोत्पादितकार्यकर्म - व्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाश्यत्वावगमात् ।

सञ्चितं द्विविधम् - सुकृतं दुष्कृतं च । तथा च श्रुतिः - " तस्य पुत्रा दायमुपयन्ति , सुहृदः साधुकृत्याम् , द्विषन्तः पापकृत्याम्" इति ।

ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तेः कथं ज्ञानिनां देहधारणमुपपद्यते इति चेत् , न , अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूप- प्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात् ।

नन्वेवमपि तत्त्वज्ञानादादेकस्य मुक्तौ सर्वमुक्तिः स्यात् , अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति चेत् , न , इष्टापत्तेरित्येके । अपरे तु एतद्दोषपरिहारायैव " इन्द्रो मायाभिः" इति बहुवचनश्रुत्यनुगृहीतमविद्यायानानात्व -

मङ्गीकर्तव्यमित्याहुः । अन्ये तु एकैवाविद्या , तस्याश्चाविद्याया
जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना ; तथा च यस्य
ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः ,
न त्वन्यं प्रति , इत्युपगमात् नैकमुक्तौ सर्वमुक्तिः । अत एव
" यावदधिकारमवस्थितिराधिकारिकाणाम् " इत्यस्मिन्नधिकरणे
अधिकारिपुरूषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणा -
नुपपत्तिमाशङ्क्य अधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं
विदेहकैवल्यमिति सिद्धान्तितम् । तदुक्तमाचार्यवाचस्पतिमिश्रैः -
" उपसनादिसंसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥ " इति ।
एतच्चैकमुक्तो सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि
प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया ।

तदेवं ब्रह्मज्ञानान्मोक्षः । स चानर्थनिवृत्तिर्निरतिशय -
ब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ।

इति वेदान्तपरिभाषायां प्रयोजनपरिच्छेदः ।

इति धर्मराज अध्वरीन्द्र विरचिता
वेदान्त परिभाषा समाप्ता ॥

*Vedanta Paribhasha*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*